## त्रयोदशः पाठः

# गीतादर्शनम्

विश्वदर्शनेषु सर्वोत्कृष्टग्रन्थाः उपनिषदः सन्ति। तासां सारः श्रीमद्भगवद्गीता वर्तते। एषा महाभारतस्य अंशः वर्तते। अत्र युद्धभूमौ भगवान् श्रीकृष्णः अर्जुनम् उपदिशति। अस्य मूलोपदेशः अस्ति यत् युद्धादिकर्त्तव्यमपि अवश्यमेव करणीयम् इति।



**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥1॥ 4/7**

**अन्वयः** – भारत! यदा, यदा, धर्मस्य ग्लानिः अधर्मस्य अभ्युत्थानम् भवति तदा हि अहम् आत्मानम् सृजामि।

**शब्दार्थः** – यदा – जब, ग्लानिः – हानि, अभ्युत्थानम् – वृद्धि, सृजामि – रचता हूँ।

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥2॥ 4/8**

**अन्वयः** – साधूनाम् परित्राणाय दुष्कृताम् विनाशाय च धर्मसंस्थापनार्थाय च युगे युगे सम्भवामि।

**शब्दार्थः** – परित्राणाय – रक्षा करने के लिये, दुष्कृताम् – दूषित कर्म करने वालों का, सम्भवामि – पैदा होता हूँ।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥3॥ 2/47**

**अन्वयः** – ते कर्मणि एव अधिकारः, फलेषु कदाचन मा कर्मफलहेतुः मा भूः, ते अकर्मणि सङ्गः मा अस्तु।

**शब्दार्थः** – कर्मणि – कर्म करने में, कदाचन – कभी, सङ्गः – प्रीति / आसक्ति।

**जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥4॥ 2/27**

**अन्वयः** – हि जातस्य मृत्युः ध्रुवः मृतस्य जन्म ध्रुवं च तस्मात् त्वम् अपरिहार्ये अर्थे शोचितुम् न अर्हसि।

**शब्दार्थः** – जातस्य – उत्पन्न हुए की, ध्रुवः – निश्चित, अपरिहार्य – अटल / न टाला जा सकने योग्य।

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः।**
**यज्ञाद्भवति पर्जन्यो यज्ञः कर्म समुद्भवः॥5॥ 3/14**

**अन्वयः** – भूतानि अन्नात् भवन्ति, पर्जन्यात् अन्नसम्भवः, पर्जन्यः यज्ञात् भवति, यज्ञः कर्मसमुद्भवः।

**शब्दार्थः** – भूतानि – सम्पूर्ण प्राणी, पर्जन्यः – वृष्टि / वर्षा, कर्मसमुद्भवः – कर्मों से उत्पन्न होने वाला

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते॥6॥ 2/62**

**अन्वयः –** विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते सङ्गात् कामः संजायते कामात् क्रोधः अभिजायते।

**शब्दार्थः –** ध्यायतः – चिन्तन करने वाले का, विषयान् – विषयों को, पुंसः – पुरुष की।

**क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥7॥ 2/63**

**अन्वयः –** क्रोधात् संमोहः भवति, संमोहात् स्मृति विभ्रमः, स्मृतिभ्रंशात् बुद्धिनाशः, बुद्धिनाशात् प्रणश्यति।

**शब्दार्थः –** सम्मोहः – अविवेक, मूढ़भाव, प्रणश्यति – नष्ट हो जाता है।

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥8॥ 4/34**

**अन्वयः –** ते तत्त्वदर्शिनः ज्ञानिनः ज्ञानम् उपदेक्ष्यन्ति, प्रणिपातेन सेवया परिप्रश्नेन तत् विद्धि।

**शब्दार्थः –** तद्विद्धि – उस ज्ञान को जानो, प्रणिपातेन – दण्डवत् प्रणाम के द्वारा।

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।**
**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥9॥ 5/26**

**अन्वयः –** एतत् अस्थिरम् चञ्चलम् मनः यतः यतः निश्चरति ततः ततः नियम्य आत्मनि एव वशम् नयेत्।

**शब्दार्थः –** यतः – जहाँ से, नियम्य – रोककर, आत्मनि एव – अपने में ही, नयेत् – ले जावें।

## अभ्यास :

### (1) एकपदेन उत्तरं लिखत –

(क) केषां परित्राणाय ईश्वरः सम्भवति ?

(ख) ते अधिकारः कुत्र ?

(ग) जातस्य ध्रुवं किम् ?

(घ) अन्नात् कानि भवन्ति ?

(ङ) कामात् कः अभिजायते?

### (2) एकवाक्येन उत्तरं लिखत –

(क) तत्वदर्शिनः किम् उपदेक्ष्यन्ति ?

(ख) चञ्चलं किम् अस्ति ?

(ग) त्वं कस्मिन्नर्थे न शोचितुमर्हसि ?

(घ) बुद्धिनाशात् किं भवति ?

## ( 3 ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) पुरुषः कथं विनश्यति ?

(ख) तत्त्वदर्शिनः कदा उपदेक्ष्यन्ति ?

(ग) ईश्वरः कदा सम्भवति ?

(घ) यज्ञः कस्मात् सम्भवति ?

## ( 4 ) रेखाङ्कितशब्दान् आधृत्य प्रश्ननिर्माणं कुरुत–

(क) क्रोधात् सम्मोहः भवति।

(ख) स्मृतिविभ्रमः सम्मोहात् भवति।

(ग) बुद्धिनाशः स्मृतिभ्रंशात् भवति।

(घ) यज्ञात् भवति पर्जन्यः।

## ( 5 ) श्लोकपूर्तिं कुरुत –

(क) अन्नाद्भवन्ति भूतानि . . . . . . . . . . . . . . . . . . ।

. . . . . . . . . . . . . . . . . . यज्ञः कर्मसमुद्भवः॥

## ( 6 ) उचितं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | साधूनाम् | कामः |
| (ख) | दुष्कृताम् | प्रणश्यति |
| (ग) | सङ्गात् | सम्मोहः |
| (घ) | क्रोधात् | विनाशाय |
| (ङ) | बुद्धिनाशात् | परित्राणाय |

## ( 7 ) उचितशब्देन रिक्तस्थानानि पूरयत –

(क) यदा यदा हि . . . . . . . . . . . . . . ग्लानिः भवति।

(ख) ते . . . . . . . . . . . . . . एव अधिकारः।

(ग) . . . . . . . . . . . . . . हि ध्रुवो मृत्युः।

(घ) ध्यायतो विषयान् . . . . . . . . . . . . . . ।

## ( 8 ) अधोलिखितपदानां पर्यायवाचिपदानि लिखत –

(क) साधुः (ख) पर्जन्यः (ग) चञ्चलम् (घ) यज्ञः

## ( 9 ) अधोलिखितपदानां विलोमपदानि लिखत –

(क) सङ्गः (ख) मृत्युः (ग) धर्मः (घ) अन्यः (ङ) परित्राणः

## ( 10 ) पञ्चमीविभक्तेः स्थाने तसिल् ( तः ) प्रत्ययं इति योजयित्वा लिखत –

| यथा | ग्रामात् | ग्रामतः |
|---|---|---|
| क. | सङ्गात् | |
| ख. | कामात् | |
| ग. | क्रोधात् | |
| घ. | सम्मोहात् | |
| ङ. | स्मृतिभ्रंशात् | |
| च. | बुद्धिनाशात् | |
| छ. | अन्नात् | |
| ज. | पर्जन्यात् | |
| झ. | यज्ञात् | |

## ( 11 ) सन्धिं कुरुत –

क. अभि + उत्थानम्

ख. सृजामि + अहम्

ग. क्रोधः + अभिजायते

घ. मनः + चञ्चलम् + अस्थिरम्

ङ. कर्मणि + एव + अधिकारः + ते

### योग्यताविस्तारः –

- पाठादतिरिक्ताः गीतायाः अन्योपदेशाः लिखत।
- पाठे आगतानि पुंल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा सूचीनिर्माणं कुरुत।

❖ ❖ ❖